अस्ति व्रतमनन्ताख्यं यत्कृतं सुरसद्मनि ।
इन्द्राद्यैर्लोकपालैश्च तन्मे कथयतः शृणु ॥
शुक्लपक्षे चतुर्द्दश्यां मासि भाद्रपदे तथा ।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति ॥ * ॥
युधिष्ठिर उवाच ।
कृष्ण कोऽयं त्वयाख्यातो योऽनन्त इति संज्ञितः ।
कोऽयं शेषस्य नागस्य अनन्तस्तक्षकः स्मृतः ॥
परमात्मोत्तमं वापि उताहो ब्रह्म उच्यते ।
क एषोऽनन्तसंज्ञो वै तन्मे ब्रूहि जनार्द्दन ॥ * ॥
श्रीकृष्ण उवाच ।
अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ।
आदित्यगतिरूपेण यः काल उपपद्यते ॥
कलाकाष्ठामुहूर्त्तादिदिनरात्रिव्यवस्थया ।
पक्षो मास ऋतुर्व्वर्षं युगकल्पव्यवस्थया ॥
सोऽहं कालोऽवतीर्णोऽस्मि भुवो भारावतारणात् ।
दानवानां विनाशाय वसुदेवतनूद्भवं ॥
अनन्तं विद्धि मां पार्थ कृष्णं विष्णुं हरिं शिवं ।
ब्रह्माणं भास्करं शेषं सर्व्वव्यापिनमीश्वरं ॥
प्रत्ययार्थं मया पार्थ विश्वरूपं निबोध तत् ।
एवमेव महाबाहो योगिध्येयमनुत्तमं ॥ * ॥
युधिष्ठिर उवाच ।
अनन्तव्रतमाहात्म्यं विधिं विधिविदां वर ।
किं पुण्यं किं फलं तस्य अनुष्ठानञ्च तस्य किं ॥
केन वा तत्कृतं पूर्ब्बं लोके केन प्रकाशितं ।
तत्सर्व्वं बहु विस्तार्य्य ब्रूहि नारायण प्रभो ॥ * ॥
श्रीकृष्ण उवाच ।
आसीत्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ।
वशिष्ठगोत्रजो विद्वान् शीलवान् विजितेन्द्रियः ॥
पत्नी तस्याभवद्दीक्षा सती सत्यव्रते स्थिता ।
चारित्रशीलसम्पन्ना सुरूपा भृगुवंशजा ॥
तस्याः कालेन संजाता दुहिता सर्व्वलक्षणा ।
शीला नाम्ना सुशीला सा वर्द्धते पितृवेश्मनि ॥
माता तस्यास्तु कालेन ज्वरदाहप्रपीड़िता ।
समागत्य नदीतोये मृता स्वर्गपुरं ययौ ॥
कृतं सुमन्तुना तस्याः कर्म्म यत् पारलौकिकं ।
ततः सुमन्तुः संत्यज्य दुःखं शोकं क्रमात् पुनः ।
नापत्नीको गृही धर्म्मं कर्त्तुमर्हति वै क्वचित् ।
इति सञ्चिन्त्य मनसा विवाहोत्सुकमानसः ॥
देवलस्य मुनेः कन्यां कर्कशां परिणीतवान् ।
सा कर्कशातिदुःशीला सदा निष्ठुरभाषिणी ॥
कोपना प्रतिकूला च निर्लज्जा कलहप्रिया ।
अदत्ता गृहकृत्येषु दक्षा भोजनकर्म्मणि ॥
कलहेन तु सन्तुष्टा रुष्टा बन्धुजनान् प्रति ।
सा तु शीला पितुर्गेहे वर्द्धिता च दिने दिने
करोति सखिभिः सार्द्धं शिशुक्रीड़ामनुत्तमां ।
गृहान्तरस्थलद्वारदेहलीतोरणादिषु ॥
चतुरङ्गकवर्णैश्च रक्तपीतसितासितैः ।
स्वस्तिकं पद्मशङ्खौ च मण्डयन्ती पुनः पुनः ॥
कुर्व्वन्ती प्रत्यहं बाला देवतातिथिपूजनं ।
गृहकृत्ये सदा दक्षा पितुरत्यन्तवल्लभा ॥
कालेन कियता विप्रस्तां दृष्ट्वा यौवनोद्गतां ।
कस्मै देया मया कन्या इति चिन्तान्वितोऽभवत् ॥

ततो दैववशात्तत्र कौण्डिन्यः समुपागतः ।
मुनिश्रेष्ठो महाभागः कुलीनो धर्म्मतत्परः ॥
मनसा चिन्तयामास सुमन्तुः सुतपाः सुधीः ।
अस्मै भाग्यवशाच्छीला प्रतिपाद्या प्रयत्नतः ॥
इति कृत्वा मतिं विप्रो ददौ कन्यां शुभे दिने ।
कन्यामलङ्कृतां साध्वीं शीलां चन्द्रनिभाननां ॥
गृह्योक्तवेदविधिना विवाहमकरोत्तदा ।
ततो होमादिकं कर्म्म समाप्य समये मुनिः ॥
सुमन्तुः कर्कशां प्राह जामात्रे देहि दक्षिणां ।
सफलं कुरु मे दानं प्रिये मुनिकुलोद्भवे ॥
दक्षिणारहितं कर्म्म निष्फलं जायते यतः ।
सा तु तद्वचनं श्रुत्वा कर्कशा कुपिताभवत् ॥
सुमन्तुं भर्त्सयामास कर्कशैर्व्वचनैः पतिं ।
अलङ्कारं समानीय स्वकीयञ्चापि बन्धनं ॥
निक्षिप्य निभृते स्थाने कर्कशान्यगृहं ययौ ।
सुमन्तुस्त्वतिदीनात्मा लज्जितश्चाभवत्तदा ॥
यत्किञ्चिदर्थयोग्यञ्च द्रव्यमानीय यौतुकं ।
जामात्रे प्रददौ विप्रः परिचार्य्य पुनः पुनः ॥
ततो विवाहं निर्व्वर्त्त्य कौण्डिन्योऽपि निजाश्रमं ।
गोयाने तां समारोप्य शीलामादाय वै ययौ ॥
ततः सा पथि गच्छन्ती शीला चन्द्रनिभानना ।
मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे ॥
ददर्श शीला नारीणां समूहं व्रतचारिणां ।
पुंसां वृन्दञ्च तत्रैव रक्तपीताम्बरासनं ॥
चतुर्द्दश्यामर्च्चयन्तं भक्त्यानन्तं पृथक् पृथक् ।
दृष्ट्वा समूहं नारीणां सती पप्रच्छ सादरं ॥
विनयावनता साध्वी प्रणिपत्य सुरेश्वरं ।
किमिदं क्रियते कार्य्यं भवतीभिस्तदुच्यतां ॥ * ॥
स्त्रिय ऊचुः ।
भाद्रे मासि सिते पक्षे उत्थिते वासवध्वजे ।
आराधिते महेन्द्रे च ध्वजाकारासु यष्टिषु ॥
नत्वा सरसि यः स्नात्वा अनन्तार्च्चनमारभेत् ।
कृत्वा दर्भमयं देवं वारिवाजसमन्वितं ॥
अनन्तं देवदेवेशं चतुर्ब्बाहुं किरीटिनं ।
अतसीपुष्पसंकाशं काञ्चनाङ्गदभूषणं ॥
शङ्खचक्रगदाशार्ङ्ग विविधायुधधारिणं ।
एह्येहि भगवन् कृष्ण तव यज्ञः प्रवर्त्तते ॥
वारिधान्यां तथानन्तं भगवन्तं नियोजयेत् ।
मण्डले पुष्पनैवेद्यं धूपवस्त्रानुलेपनं ॥
दत्त्वा च पूजयेद्भक्त्या अनन्तं विश्वरूपिणं ।
पिष्टकार्थं व्रीहिचूर्णं यवगोधूमयोश्च वा ॥
एतेषां प्राप्यते यत्तु तद्ग्राह्यं प्रस्थसंज्ञितं ।
अर्द्धं विप्राय दातव्यमर्द्धमात्मनि योजयेत् ॥
पूजयित्वा तथा देवं गन्धपुष्पैर्यथाक्रमं ।
श्रुत्वा कथां ततस्तस्य कुङ्कमाक्तं सुडोरकं ॥
चतुर्द्दशग्रन्थियुक्तं नारी वामकरे न्यसेत् ।
पुमांस्तु दक्षिणे बाहौ तदानन्तं प्रपूजयेत् ॥
निर्व्वर्त्त्य पूजां देवस्य पूपं भुक्त्वा यथासुखं ।
विसृज्य दक्षिणां दत्त्वा प्रणम्य च यथासुखं ॥
शीला श्रुत्वा वचस्तासां यथा ताभिरुदाहृतं ।
व्रतं चकार सा बाहौ बद्ध्वा डोरकमुत्तमं ॥
पूपप्रस्थञ्च सा कृत्वा भुक्त्वा चैव तथैव च ।

पुनर्जगाम तेनैव गोरथेन समन्विता ॥
तेनानन्तप्रसादेन गृहं गोधनसङ्कुलं ।
तदाश्रमं श्रिया युक्तं धनधान्यसमन्वितं ॥
विविधातिथिसम्पूर्णं नानारत्नैर्विभूषितं ।
वराश्वमत्तमातङ्गमहिषैर्गोधनान्वितं ॥
शीला च मणिकाञ्चीभिर्मुक्ताभरणभूषिता ।
दिव्याङ्गी शीलसम्पन्ना सावित्रीप्रतिमा यथा ॥
कदाचिदुपविष्टा सा वह्निकुण्डं समागता ।
कौण्डिन्योऽपि विशेषात् दृष्ट्वा डोरमनन्तकं ।
शीलायाः करमूले च बद्धमेव प्रयत्नतः ।
पप्रच्छ क्रोधवचसा भ्रुकुटीकुटिलं मुखं ॥
किमिदं डोरकं हस्ते बद्ध्वा भार्य्येऽत्र तिष्ठसि ।
प्रमेयः कस्य देवस्य दुर्ब्बुद्धे ब्रूहि सत्वरं ॥*॥
शीलोवाच ।
अनन्तं देवदेवस्य प्रमेयं डोरकं शुभं ।
करे बद्धं विधानेन शृणु मे वचनं प्रभो ॥
प्रसादाद्यस्य देवस्य भुङ्क्ते सुविपुलं धनं ।
न जानासि कथं नाथ तद्देवं जगदीश्वरं ॥
शीलावाक्यं ततः श्रुत्वा कौण्डिन्यः कुपितोऽभवत् ।
कोऽसावनन्तसंज्ञो वै न श्रुतोऽपि वरानने ॥
इत्युक्त्वाकृष्य कुपितो भुजाड्डोरमनन्तकं ।
क्षिप्तं ज्वालाकुले वह्नौ निर्भर्त्स्य बहुधा प्रियां ॥
ततः सा संभ्रमात् शीला हाहा कृत्वा प्रधाविता ।
वह्नेः सूत्रं समादाय क्षीरमध्ये ततोऽक्षिपत् ॥
ततस्तया करे वामे पुनर्बद्धं सुडोरकं ।
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥
न केश्चित् वर्ण्यते लोकैः सोऽपि विप्रो युधिष्ठिर ।
गात्रे मलिनता प्राप्ता चक्षुर्निद्रां तथैव च ॥
शून्यानि गृहरूपाणि दग्धानि वह्निना क्वचित् ।
निरीक्ष्य स्वपुरं विप्रश्चिन्तयामास चेतसा ॥
अथ शीला विवर्णा सा दुःखिता पतिदोषतः ।
विचचार पुरीं सर्व्वां शून्यागारसमन्वितां ॥
अथ कौण्डिन्यविप्रस्य संजाता बुद्धिरुत्तमा ।
ममापि दुष्कृतं कर्म्म कृतं वा मे विगर्हितं ॥
अनन्ताक्षेपदोषेण ममापि गतिरीदृशी ।
अनन्तं यत्र पश्यामि तत्र यास्यामि दुर्म्मतिः ॥
ततो जगाम कौण्डिन्यो वनं व्याघ्रादिसङ्कुलं ।
व्रतस्यान्वेषणं कर्त्तुं पादौ द्रष्टुं तथा हरेः ॥
विक्लवः स ययौ मार्गे जनजन्तुविवर्ज्जिते ।
तत्रापश्यच्च तं वृक्षं फलपुष्पसमन्वितं ॥
वर्ज्जितं पक्षिसङ्घातैः कीटैश्चैव विशेषतः ।
तमपृच्छत् त्वयानन्तः क्वचिद्दृष्टो महाद्रुम ॥
स चोवाच महावृक्षो नानन्तं वेद्मि भो द्विज ।
ततो गच्छन् ददर्शाग्रे तृणमध्ये सवत्सिकां ॥
तृणमध्ये प्रधावन्ती न खादति न जिघ्रति ।
हे महाधेनुके ब्रूहि किमनन्तस्त्वयेक्षितः ॥
सवत्सा तमुवाचाथ नानन्तं वेद्मि हे द्विज ।
ततो गच्छन् ददर्शाग्रे वृषश्रेष्ठं वने स्थितं ॥
तमपृच्छदयं विप्रः अनन्तो वीक्षितस्त्वया ।
वृषभस्तमुवाचेदं विषण्णं ब्राह्मणं प्रति ॥
यद्यनन्तमहं जाने तदा मे गतिरीदृशी ।
ततो व्रजन् ददर्शाग्रे गर्द्दभं कुञ्जरं तथा ॥